दानवाः अवदन्, 'पितामह। तपः कृत्वा अस्माकं शरीराणि जीर्णानि। वयम् अपि श्रान्ताः।' प्रजापतिः विचारम् अकरोत्। सः शक्तिम् अवदत् 'त्वमेव बालकानां दुःखं दूरं कुरु।' शक्तिः अहसत्। सा चन्द्रस्य निर्माणम् अकरोत्। किन्तु सूर्यस्य तेजसा चन्द्रः न प्रकाशते स्म। ततः शक्तिः स्वशरीरवामभागात् रात्रिम् असृजत्। प्रजापतिः स्वदक्षिणपार्श्वात् दिवसम् असृजत्। प्रजापतिः सूर्यस्य तेजः दिवसाय अददात्। शक्तिः चन्द्रस्य स्थानं रात्रौ अददात्। ततः पश्चात् प्रजापतिः शक्तिम् आदिशत्। त्वं स्वप्नानां सर्जनं कुरु। शक्तिः अवदत् 'तथास्तु।' प्रजापतिः देवानां कृते स्वर्गे स्वप्नमयीं सृष्टिम् अरचयत्। शक्तिः त्रिषु लोकेषु अनेकान् पदार्थान् असृजत्।

रात्रौ चन्द्रः आगच्छति स्म। सर्वे स्वपन्ति स्म। देवाः स्वर्गे प्रसन्नाः अभवन्। अधुना मनुष्याः रात्रौ यज्ञान् न कुर्वन्ति स्म। दानवाः रात्रौ तपः न कुर्वन्ति स्म। शक्तिः चन्द्रेण सह नक्षत्राणि असृजत्। चन्द्रस्य प्रादुर्भावात् समुद्रे वेला जाता। प्राणीनाम् सन्तापः अपि नष्टः अभवत्। सूर्यस्य सन्तापः अपि नष्टः अभवत्। सर्वे स्वप्नान् दृष्ट्वा प्रसन्नाः अभवन्। प्रातःकाले स्वप्नान् स्मृत्वा सर्वे स्वदुःखानि व्यस्मरन्।

अधुना देवाः स्वर्गे प्रसन्नाः मनुष्याः पृथिव्यां प्रसन्नाः दानवाः पाताले प्रसन्नाः। प्रजापतिः पुनरपि ध्यानं करोति। शक्तिः सर्वान् बालकान् प्रसन्नान् दृष्ट्वा प्रसन्ना भवति। इत्थं रात्रिदिवसौ अभवताम्।



-८, राजतिलक बंगलो,
आबादनगरम् बसस्थानकस्य पार्श्वे,
बोपल, अहमदाबादम्-३८००५८

# सुभाषपञ्चकम्

-डॉ. श्रीमन्त-चट्टोपाध्यायः

निर्भीकं पूतसन्तानं जने जने सुपूजितम्।
सुभाषचन्द्रमस्वप्नं तं नमामस्तरस्विनम्॥१॥

स्वदेशायार्पितप्राणान् कृतभूरिपरिश्रमम्।
सुभाषचन्द्रमस्वप्नं तं नमामस्तरस्विनम्॥२॥

आध्यात्मिके तु कल्याणे आत्मनिवेदितं सदा।
सुभाषचन्द्रमस्वपनं तं नमामस्तरस्विनम्॥३॥

अमितव्ययिनं त्यागेऽद्वितीयं खलु कर्मणि।
सुभाषचन्द्रमस्वप्नं तं नमामस्तरस्विनम्॥४॥



सीमातीतं हि सौहार्दे धीभाजमब्धिगह्वरम्।
सुभाषचन्द्रमस्वप्नं तं नमामस्तरस्विनम्॥५॥

-सहकारी अध्यापकः, संस्कृतविभागः,
त्रिवेणीदेवी-भारोविया-महाविद्यालयः,
राणीगञ्जः, पश्चिमबर्धमान्-७१३३४७,
प.बङ्गालः

# वैदिकयज्ञविज्ञानम्

-शिवदेव आर्यः

तैत्तिरीयारण्यके यज्ञस्य रूपमेवं व्याख्यातम् तद्यथा- 'यज्ञस्याऽऽत्मा यजमानः श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदः शिखा हृदयं यूपः काम आज्यं मन्युः पशुस्तपोऽग्निर्दमः शमयिता दक्षिणा वाग्धोता प्राणोद्गाता चक्षुरध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीद् यावद् ध्रीयते सा दीक्षा यदश्नाति तद्धविर्यत् पिबति तदस्य सोमपानं विद्यते सदुपसदो यत्संचरत्युपवित्युत्तिष्ठते च स प्रवर्ग्यो यन्मुखं तदाहवनीयो या व्याहृतिराहुतिर्यदस्य विज्ञानं तज्जुहोति यत्सायं प्रातरत्तिः तत्समिधं यत्प्रातर्मध्यन्दिनं सायं च तानि सवनानि ये अहोरात्रे ते दर्शपूर्णमासौ येऽर्धमासश्च मासाश्च ते चातुर्मास्यानि च ऋतवस्ते पशुबन्धा ये संवत्सराश्च परिवत्सराश्च तेऽहर्गणाः सर्ववेदसं वा एतत्सत्रं यन्मरणं तदवभृथः। एतद्वै जरामर्यमग्निहोत्रं सत्रम्।''[1]

आध्यात्मिकमिदं यज्ञस्य स्वरूपम्। सर्वं जीवनमत्र यज्ञे समाविष्टम्। अयमभिप्रायः- नर्ते यज्ञादाजन्मन आमृत्योः किञ्चिदपिसिध्यति, आदानप्रदानयोरेव यज्ञरूपत्वाद्विनादान-प्रदानाभ्याञ्च क्षणमपि जीवितुमशक्यत्वात्। चराचरयोः जडचेतनयोर्वा किञ्चिदपि कूटस्थं नावतिष्ठते। सर्वत्र सर्वं सर्वदा परिणमते। षड्भावविकारा त्रिषु जन्मस्थितिप्रलयेष्वन्तर्भवन्ति। आदानेन जन्म प्रदानेन च प्रलयः। उत्पत्तिप्रलययोर्मध्यवर्तिनी स्थितिः। रजस उत्तपत्तिः, सत्तवेन स्थितिः, तमसा च प्रलयः। प्राकारान्तरेण विष्णोरुत्पत्तिः, ब्रह्मातः स्थितिः, शिवेन च प्रलयः। इयमेव त्रिमूर्तिरिम एव त्रयोगुणाः-

**रजोजुषे जन्मनि सत्त्ववृत्तये स्थितौ प्रजानां प्रलये तमः स्पृशे।**
**अजाय सर्ग- स्थितिनाश-हेतवे त्रयीमयाय त्रिगुणात्मने नमः॥**[2]

विष्णुराददाति, ब्रह्मा स्थापयति। इन्द्रश्च प्रददाति। तत्र यावद् विष्णुराददाति तावद् आदानप्रदानात्मकः यज्ञः प्रचलति। तस्माद् यो वै विष्णुः यज्ञः।[3] यदिन्द्रेण बहिर्गच्छति तद् बलमग्निरित्युच्यते। यद्विष्णुना समायातं तत् सोम इति। अग्नौ सोमाहुतिरेव यज्ञः अनेनैव यज्ञेन ऋतवः जायन्ते। तद्यथा वसन्तग्रीष्मवर्षाः अग्निः शरद् हेमन्त शिशिराः सोमः। अनयोः संयोगेन शैत्योष्ण्यतादात्म्ये ऋतवः सम्पद्यन्ते। तथैव अहरग्निः, रात्रिः, सोमः, अनयोः संयोगः अहोरात्रम्। अस्य प्रतिनिधिभूतः अग्निहोत्रम्। शुक्लपक्षोऽग्निः। कृष्णपक्षः सोमः। अनयोः संयोगः मासः। तस्य प्रतिनिधिभूतः पशुबन्धयज्ञः। एषां चतुर्णां समष्टिः संवत्सरः। तस्य प्रतिनिधिभूतः सोमयागः। प्रकृतिः सर्वशक्तिमती सर्वं सञ्चालयत्यपि न बध्यते। एवं यज्ञं सम्पाद्यमानोऽपि यजमानः सर्वशक्तिमान् जायते न च बध्यते।

प्रजापतिः यज्ञेनैव सृष्टिं सृजति। अस्य आधिदैविकयज्ञस्य विवरणं शतपथब्राह्मणे विस्तरेण श्रूयते- तत एवं परमेष्ठी प्रजापत्यो यज्ञमपश्यद्यद्दर्शपूर्णमासौ ताभ्यामयजत ताभ्यामिष्ट्याकामयताहमेवेदं सर्वं स्यामिति स

१. तैत्तिरीयारण्यकम्, १०.६४।

२. कादम्बरी, मङ्गलश्लोकः।

३. माध्यन्दिन-शतपथब्राह्मणम् ५.२.३.६।

आपोऽभवदापो वा इदं सर्वं ता यत्परमे स्थाने तिष्ठन्ति योहीहाभिखनेदप एवाभिविन्देत्परमाद्वा एतत्स्थानाद्वर्षति यद्दिवस्तस्मात्परमेष्ठी नाम। स परमेष्ठी प्रजापतिं पितरमन्ब्रवीत्। कामप्रं वा अहं यज्ञमदर्शं तेन त्वा यज्ञमदर्शं तेन त्वा याजयानीति तथेति तामयाजयत्स इष्ट्वाकामयताहमेवेदं सर्वं स्यामिति स प्राणोऽभवत्प्राणो वा इदं सर्वमयं वै प्राणो योऽयं पवते स प्रजापतिस्तस्य दृष्टिर्यदेव वेदेत्थाद्वातीति यद्वै किंच प्राणि स प्रजापतिः स यो हैवमेतां प्रजापतेर्दृष्टिं वेदाविरिव हैव भवति। स प्रजापतिरिन्द्रं पुत्रमन्ब्रवीत्। अनेन त्वा कामप्रेण यज्ञेन याजयानि येन मामिदं परमेष्ठ्ययी यजेदिति तथेति तमयाजयत्स इष्ट्वाकामयताहमेवेदं सर्वं स्यामिति स वागभवद्वाग्वा इदं सर्वं तस्मादाहुरिन्द्रो वागिति। स इन्द्रोऽग्नीषोमौ भ्रातरावन्ब्रवीत्। अनेन वा कामप्रेण यज्ञेन याजयानि येन मामिदं पिता प्रजापतिरयीयजेदिति तथेति तावयाजयत्ताविष्ट्वाकामयेतामावामेवेदं सर्वं स्यावेति तयोरन्नाद एवान्यतरोऽभवदन्नमन्यतरोऽन्नाद एवाग्निरभवदन्नं सोमोन्नादश्च वा इदं सर्वमन्नं च। ता वा एताः। पञ्च देवता एतेन कामप्रेण यज्ञेनायजन्त ता यत्कामा अयजन्त स आभ्यः काम समाध्र्यत यत्कामो ह वा एतेन यज्ञेन सोऽस्मै कामः समृध्यते।''[४]

प्रत्यक्षतोऽपि यज्ञस्य निर्माणशक्तिः दृश्यते। पिण्डस्य निर्मितिरग्निना सम्पद्यते। अयमग्निः अभितः शक्तिं गृह्णाति। इदमग्नेः अशनायाः बलस्य फलम। अशनायाः हेतोरग्निः रोदति–

**'अग्निर्वै रुद्रो यदरोदीत् तस्माद् रुद्रः।'**[५]

अस्य अग्नेः, संपर्कात् द्यावापृथिव्यौ रोदसी इत्यभिधीयेते। प्रतिपिण्डं सान्तरिक्षमियं त्रिलोकी। तां परितः शक्तिः विकीर्णा। व्यापकत्वात् सा शक्तिः आप इत्युच्यते। अयमेव स चतुर्थः आपोलोकः यमधिकृत्यश्रुतिराह–

**'अस्ति वै चतुर्थो देवलोकः आपः'**[६]

अस्मादेव आपो–लोकात् विष्णुः पिण्डे सोमाहुतिर्ददाति। तस्माद् विष्णुः समुद्रे शेते इति पौराणिकाः। गर्भस्थोऽग्निः गर्भे, बीजस्थोऽग्निः वृक्षे अस्मादेव सर्वतः प्रसृतात् आपोलोकात् भूतांशे ग्राहं ग्राहं प्राणत्वेन परिणमते। अयं च प्राणांशः एकतः मनः अपरतः वाचञ्चिनोति। अयमन्योन्परिणमनविधिः यज्ञः–

**'वाचश्चित्तस्योत्तरोत्तर क्रमो यज्ञः'**

अत्र परिणमने प्राणक्रिया एव हेतुः। तस्मादुच्यते **''प्राणैरु यज्ञस्तायते''**[७]

अग्नौ आहुतो सोमः अग्नित्वेन परिणमते। पुनः ज्वालारूपेण उत्थितः अग्नौ आहुतः अग्नित्वेन परिणमते। एवं मूलतः एकोऽपि देवः यज्ञप्रक्रियया द्विधा विभक्तः बहुत्वेन परिणमते **''एकं वा इदं विबभूव सर्वम्।''**

विना द्वैतां सृष्टिर्न प्रवर्तते। तदेव द्वैतं अग्निषोमाभ्यां प्रतीकरूपेण अभिधीयते। तद् द्वैतम् अहोरात्ररूपेण मातापितृरूपेण, सूर्यचन्द्ररूपेण, द्यावापृथिवीरूपेण, भृग्वाङ्गिरारूपेण, शीतोष्मरूपेण, गत्यागतिरूपेण सर्वत्र प्रसरति। अनयोः मिथः संगमनमेव यज्ञः। तद्यथा देवपूजासंगतिकरण–दानार्थकात् यज धातोः यज्ञ शब्दो निष्पन्नः। आदानप्रदानेन देवानां पोषणं भवति। तत्त्वस्य तत्त्वान्तराद्संगमनेन अपूर्वोत्पत्तिर्भवति आत्मनश्च अन्यत्र समर्पणं भवति। समर्पणं त्रिविधम्। धनादेः समर्पणं दानम्। भोजनसुखादेः समर्पणम् अनशनादितपः। आत्मसर्पणं पुनर्यज्ञः।

---

४. माध्यन्दिन शतपथब्राह्मणम् ११.१.६.१६–२०।

५. तथैव। ६.१.३.१०।

६. कोषीतकी ब्राह्मणम् १८.२।

७. जैमिनीयब्राह्मणम् २.४३.११।

तस्मात् सर्वत्र यज्ञप्रकरणे यजमानः आत्मानमेव समर्पयति आहुतिरूपेण। तस्मात् पुरुषसूक्ते पुरुष एव पशुत्वेन बद्धः– **'देवाः यद्यज्ञं तन्वाना अबध्नन् पुरुषं पशुम् ।'**[८]

दानानुरुपमादानं भवति। दाने द्रव्यत्यागः, तस्य फलं लघु। तपसि सुखत्यागः, तस्य फलं बृहत्तरम्। यज्ञे पुनरात्मत्यागः। तस्माद् यज्ञस्य फलं वृहत्तमम्। अतएवोच्यते–सर्वेभ्यो हि कामेभ्यो यज्ञः प्रयुज्यत इति।[९] यतः यज्ञे आत्मा समर्प्यते तस्मात् प्राकृतिकं जन्म समाप्तिमाप्नोति। नवीनं च जन्म सम्पद्यते। तदेव द्विजत्वम्। प्राकृतिकं जन्म अस्मै लोकाय, यज्ञात् जन्म परस्मै लोकाय। **''द्विर्ह वै यजमानो जाते मिथुनादन्यत् जायते यज्ञादन्यत्। तद्यन्मिथुनाद्जायते तदस्यै लोकाय जायते। अथ यद् यज्ञाज्जायते तदुमुष्मै लोकाय जायते।''**[१०]

यज्ञस्य अयं विधिः। प्रकृतौ यद् यथा भवति तत् तथा कर्तव्यम्। 'यद्वै देवाः अकुर्वंतत् करवाणि''[११] तत्र स्वकल्पनया मनुष्यः यदि परिवर्तते तर्हि यज्ञस्य व्यृद्धं–''व्यृद्धं वै तत् तद्यज्ञस्य यन्मानुषम् शास्त्रेषु''[१२] सर्वं वैधयज्ञस्य प्राकृतयज्ञानुरूपत्वं प्रदर्शितम्। तद्यथा 'यदि दन्ताः तर्हि पुरोऽनुवाक्या, न चेद् दन्ताः न पुरोऽनुवाक्या' इति नियममनुसृत्य दर्शपौर्णमासे पुरोऽमुवाक्यायाः अयं क्रमः–

| | |
|---|---|
| १. सद्यः जातस्य शिशोर्न दन्ताः | १. प्रयाजेषु न पुरोऽनुवाक्या |
| २. किञ्चिद् वृद्धस्य बालकस्य पुनर्दन्ताभावः | २. द्वितीय हविर्विना पुरोऽनुवाक्याम् । |
| ३. किञ्चिद् वृद्धतरस्य बालकस्य पुनर्दन्तोद्भवः | ३. पत्नी संयाजे पुनरनुवाक्या। |
| ४. वृद्धावस्थायां पुनर्दन्ताभावः | ४. अन्ते समीष्टयजुषि न पुरोऽनुवाक्या। |

इत्येवं स्थाने स्थाने बहुत्र वैधयज्ञस्य प्राकृतिकयज्ञानुरूपता शास्त्रे प्रपञ्चिता। प्रकृतिनिरीक्षणं विज्ञानस्य आत्मा। प्रकृतिनिरीक्षणं विना च वैधयज्ञप्रक्रियानिर्णयोऽपि न संभवतीति यज्ञानां विज्ञानोपोद्बलकत्वं स्वतः सिद्धम्।

यज्ञः पाङ्क्तः।[१३] कारण सूक्ष्म स्थूल शरीराणि त्रीणि आद्यपृष्ठानि स्पृश्यानि। मध्यवर्त्ति १७ अहर्गणपर्यन्तं मध्यपृष्ठं पदार्थस्य आकर्षण–शक्तिक्षेत्रम् आहवनीयामित्युच्यते, तत्पर्यन्तमेव सोमस्य आहवनसंभवात्। तदनन्तरं अन्तिमं बहिर्वृष्ठं ३३ अहर्गणपर्यन्तम्। तावत् पदार्थो दृग्गोचरीभवति। कारण शरीरमुक्थम्। सूक्ष्मशरीरं विराट्। स्थूल शरीरं वैराजम्। मध्यपृष्ठं छन्दस्यम्। बहिर्पृष्ठं च सर्वमिति पञ्चपृष्ठानि यज्ञाङ्गभूतानि। तस्मात् पांक्तो वै यज्ञः।

परवर्तिदर्शने यत्पञ्चीकरणं तदैव यज्ञप्रकरणे सर्वहुतयज्ञ इत्युच्यते। पञ्चीकरणप्रक्रियायां तत्त्वं सर्वथा आत्मानं जुहोति। पञ्चानामपि तत्त्वानां पञ्चस्वपि तत्त्वेषु आहुत्या तत्त्वान्तरोत्पत्तिः सूक्ष्मात् स्थूलोत्पत्तेः प्रक्रिया। इयमेव सृष्टिप्रक्रिया। तस्मात् यज्ञं विना न किञ्चित्सृज्यते। सृष्टिमूलभूतस्य अस्यैव यज्ञस्य पुरुषसूक्ते विवरणम्। अत्र यज्ञे सोमाभावात् पुरुषस्यैव हविः कल्प्यते–**''यत्पुरुषेण हविषा देवा यज्ञमतन्वत।''**[१४]

---

८. ऋग्वेद १०.९०.७।

९. तैत्तिरीय संहिता २.४.११.२।

१०. जैमिनीयब्राह्मणम् १.२५९ ।

११. तथैव ।

१२. माध्यन्दिन शतपथब्राह्मणम् १.४.१.३५।

१३. तैत्तिरीयसंहिता ५.२.३.६ ।

१४. ऋग्वेदः, १०.९०.६ ।

तानिधर्माणि प्रथमान्यासन्निति कृत्वा यज्ञेषु आत्मैवार्यते। इदमात्मार्पणमेव निष्कामकर्मण: मूलम्। निष्कामकर्म्मणोमहिमा गीतायां विस्तरत: प्रपञ्चित:। तद्द्वारा च सर्वक्रियाकलापस्य यज्ञमयत्वं समर्थितम्–

**''यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धन:''**[१५]

स्वोपकाराय तप:। परोपकाराय दानम्। सर्वोपकाराय च यज्ञ:। तस्मादेतानि त्रीणि न त्याज्यानि–

**''यज्ञदानतप: कर्म न त्याचं कार्यमेव तत्''**[१६]

इत्थं यज्ञो न केवलम् इहलोकं परलोकं प्रत्युत मोक्षमपि साधयति इत्यलम् ।

**–गुरुकुलपौन्धा, देहरादूनम्,**
**उत्तराखण्डम्**

१५. गीता ३.९
१६. गीता १८.५

# संस्कृत-पत्रकारितायाः
# ऐतिह्यं दैनिक-साप्ताहिक-पाक्षिकसंस्कृत-समाचार-पत्राणि च

**-डॉ. विमलेन्दुकुमारः त्रिपाठी**

मानवजीवनमतीव विशिष्टमिति ज्ञायत एव निखिलमनुष्यैः। ईश्वरस्य समग्रसृष्टेः अनुपमा रचना मनुजरूपेण राराजते। मानवस्यास्य ऐतिह्यं सांस्कृतिक-साहित्यिक-परम्पराञ्चावगन्तुं संस्कृतवाङ्मयस्य तन्निबद्धसाहित्यस्य परिशीलनमपरिहार्यम्। साहित्यस्य, साहित्ये उपनिबद्धविषयाणाञ्च लोके आलोकाय पत्र-पत्रिकादीनामावश्यकता परिलक्ष्यते। अतएव न केवलमद्यतनीने युगे अपितु पुराकालाद् एव पत्रकारितायाः आवश्यकता सर्वविदिता वर्तते। साहित्यस्य विविधविधासु पत्रकारिता भव्यैका नूतना दिव्या चास्ति विधा। पत्रकारितायां ज्ञान-विज्ञान-कला-दर्शन-राजनीति-समाज-शिल्प-साहित्यादि-विषयाणां वैशिष्ट्यं प्रतिपाद्यते। तत्सम्बद्धाः सूचनाश्च प्रकटीकरोति पत्रकारिता। ज्ञान-विज्ञानयोः विलक्षणविधायाः अस्याः सर्वप्रथमोल्लेखः वैदिकयुगाद् प्राप्यते। संस्कृतवाङ्मये वार्ताहरणम्, वृत्तसम्प्रेषणम्, संवादसंचयः, उद्घोषणाज्ञापनम्, हस्ताक्षरांकनम्, सामंजस्य पत्रादिकमवाप्यते। पौराणिककाले महर्षिनारदः आदिपत्रकारत्वेनानुमीयते। वाल्मीकिरामायणे 'सुमुख' नामाख्यः गुप्तचरः श्रीरामं गुप्तसूचनां विज्ञापयति। महाभारतेऽपि संजयः दिव्यदृष्ट्या धृतराष्ट्रं कुरुक्षेत्रयुद्धं प्रत्यक्षं वर्णयति। लौकिकसंस्कृतसाहित्ये महाकविकालिदास- विरचिते प्रसिद्धे 'अभिज्ञानशाकुन्तलम्'-नामके नाटके प्रणयपत्रं लिखितवत्या शकुन्तलायाः मनोरमं चित्रं चित्रितमस्ति। प्रणयपत्रमिदं दुष्यन्त- विषयकमिति विद्वद्भिः विज्ञायते। तद्यथा-

**तव न जाने हृदयं मम पुनःकामो दिवाऽपि रात्रावपि।**
**निर्घृण तपति बलीयस्त्वयि वृत्तमनोरथान्यंगानि॥**

भारवि -विरचित ''किरातार्जुनीयम्''-नामाख्ये महाकाव्ये गुप्तचराणां चर्चाऽवाप्यते। तदनु--

**क्रियासु युक्तैर्नृप चारचक्षुषो,**
**न वञ्चनीयाः प्रभवोऽनुजीविभिः।**
**अतोऽर्हसि क्षन्तुमसाधु साधु वा,**
**हितं मनोहर च दुर्लभं वचः॥**

''अत्र चारचक्षुषः एव गुप्तचररूपेणावगम्यन्ते। चरन्तीति चराः चराः एव चाराः, चाराः एव चक्षूंषि येषां ते चारचक्षुषः।''

संस्कृत-पत्रकारितायाः प्रारम्भिकः इतिहासः अर्नेस्ट हास महोदयात् प्रारभ्यते। अयं जनः ''ब्रिटिश-म्यूजियम'' संरक्षिते --

"Catalouge of sanskrit and Pali books in the British museum"

पालिग्रन्थसूचीनिर्मितिसमये १८७६ तमे वर्षे पत्रिकाणां सूचनां दत्तवान्। अनन्तरं मैक्समूलर महोदयः १८८२ तमे वर्षे

'India what can it teach us' नामके पुस्तके तदनु एल०डी०बर्नेट महोदयः अयमपि पुस्तकसूचीं निर्माय 1892 तमे वर्षे प्रकाश्यतामानीतवान्। भारते पत्रकारितायाः प्रारम्भः हिन्दी-भाषायाः लब्धचर्चितसाप्ताहिकपत्रम् 'उदन्तमार्तण्ड' रूपेणावगम्यते। पत्रस्यास्य प्रकाशनं ३० मई १८२६ वर्षतः प्रत्येकं मंगलवासरे श्रीजुगुलकिशोरशुक्ल महोदयानां सम्पादकत्वे जायमानमासीत्। समाचारपत्रस्यास्य मुखपृष्ठे समाचारमहत्त्वख्यापकं पद्यमिदमवाप्यते स्म।

**दिवाकान्तकान्तिं विना ध्वान्ततान्तम्।**
**न चाप्नोति तद्वज्जगत्यज्ञलोकः।।**

वर्तमानयुगीनसंस्कृतपत्रकारितायाः अभिप्रायः श्रव्य-पत्रकारितया गृह्यते। यस्याः सम्बन्धः आकाशवाण्या सह वर्तते। आकाशवाण्याः प्रारम्भिकः कालः इटली वास्तव्यस्य जी०मार्कोनी महोदयस्य १८९५तमे वर्षे (वायरलेस)-माध्यमेन ध्वनि संकेतादि प्रेषणे साफल्यतायामवलोक्यते। तदनु भारते १९२१ तमे वर्षे मुम्बईनगर्यां (टाइम्स ऑफ इंडिया) डाकतारविभागसहयोगेन प्रथमसंगीतकार्यक्रमः प्रसारितः जातः। विधिवतरूपेण 'ऑल इंडिया रेडियो' इत्यस्य स्थापना १९३६ तमे वर्षे अभवत्। वर्तमानसमये आकाशवाणी चतुर्विंशति भाषासु १४६ बोलीषु कार्यक्रमं प्रस्तौति।

'दृश्यश्रव्योभयात्मकपत्रकारिता' यस्याः सम्बन्धः दूरदर्शनेन, 'मुद्रण-पत्रकारिता' यस्याः सम्बन्धः पत्र-पत्रिकाभिः विज्ञायते।

'पत्रकारितायाः सम्बन्धः सूचनानां संकलनेन तदनु सम्पादनद्वारा प्रत्येकं पाठकाय सुलभतया उपलब्धतायां वर्तते। परन्तु सर्वाः सूचनाः समाचारत्वेनाङ्गी क्रियन्ते। पत्रकारैः काश्चन्नेव घटनाः, समस्याः केचन्नेव विचाराः समाचारत्वेन प्रस्तूयन्ते।'' काऽपि घटना समाचारत्वेन तदैव स्वीक्रियते यदा तस्यां घटनायां नवीनता-जनरुचिः-निकटता-प्रभावोत्पादकादि गुणाः भवेयुः। समाचाराणां सम्पादने तथ्यपरकता-वस्तुपरकता-निष्पक्षता-सन्तुलनादि सिद्धान्तानामनुपालनमपरिहार्यमेव भवति। मुद्रणपत्रकारितामभिलक्ष्य संस्कृतपत्रकारितां चर्चयामश्चेत् संस्कृतवाङ्मयस्य प्रचार-प्रसारदृष्ट्या संस्कृतस्य विद्वद्भिः संस्कृतसमाचार-पत्रस्याभिधानानि नैकरूपेण प्रदतानि। यथा---वृत्तान्तः, वार्ता, उदन्तः, वृत्त, श्रुति, संवादादि। समाचारपत्राणामेतेषां मूलमुद्देश्यं संस्कृतं जनसामान्या भाषा कथं भवेत्, तद् साहित्यस्यश्रीवृद्धिः सर्वतोभावेन कथं स्यादित्युररीकृत्य संस्कृतसमाचारपत्राणि प्रकाशितानि प्रकाश्यमानानि च सन्ति। समाचारपत्राणामेतेषां स्वरूपं दैनिक-साप्ताहिक-पाक्षिक-मासिक-द्वैमासिक-त्रैमासिक-चातुर्मासिक-षाण्मासिक-वार्षिकादि प्रकारेणोप-लभ्यते। संस्कृतभाषायाः सर्वप्रथमं मासिकपत्रं 'काशीविद्यासुधानिधिः' वाराणसीतः १ जून १८६६ वर्षात् प्रकाशितमभूत्। संस्कृतसमाचार-पत्रमिदं- 'पण्डित-पत्रिका' नाम्नाऽपि व्यह्रियते स्म। संस्कृतपत्रेऽस्मिन् प्राचीन संचिका, नूतनसंचिका रूपेण प्रकाशित-प्रतीनामुल्लेखः पत्रिकायामवाप्यते। १९१७ ईस्वीयवर्षाद् पत्रमिदमप्रकाश्यमानमस्ति। संस्कृत-पत्रकारिताक्षेत्रे पत्रस्यास्य विशिष्टमवदानमिति।

भारतीयविद्वत्सु प्रकाण्डपण्डितः अप्पाशास्त्री राशिवेडकर महाभागः प्रथमतयासंस्कृतपत्रपत्रिकादीनां सूचनामथ च समीक्षां प्रारब्धवान्। 'संस्कृत-चन्द्रिका' नामाख्यायाः विश्रुतपत्रिकायाः सम्पादकत्वं न्यभालयतानेन पत्रकारितायां विशिष्टमवदानं दत्तम्। अस्याः पत्रिकायाः वर्षस्य प्रथमे अंके संस्कृतस्यान्यान्य पत्रिकाणां परिचयः,

प्रकाशनक्षेत्रं, विषय:, समीक्षाश्च प्रकाश्यन्ते स्म। इदं सर्वमपि कार्यं अप्पाशास्त्रिमहोदयै: सम्पाद्यमानमासीत्। पण्डित अम्बिकादत्तव्यासविरचित शिवराजविजयस्य प्रथमतया प्रकाशनमस्यामेव संस्कृत-चन्द्रिकापत्रिकायाम-भवत्। संस्कृत-पत्रकारिताक्षेत्रे युगान्तकारी परिवर्तनं 'संस्कृतरत्नाकर' पत्रं संदधते। १९०४ वर्षाद् जयपुरनगरात् पत्रमिदं प्रकाश्यमानमासीत्। अस्य पत्रस्य नैके सम्पादका: येषु पण्डितगिरिधरशर्मा चतुर्वेद-पण्डित सूर्य नारायण शर्मा-भट्टमथुरानाथशास्त्रिण:। एवमेव सारस्वती-सुषमा-भारती-स्वरमंगला-दूर्वा-संस्कृत-मञ्जरी प्रभृतय: नैका: पत्रिका: संस्कृतजगत् चमत्कृतं कुर्वन्ति।

'संस्कृत भाषा में पत्र और पत्रिका' शीर्षकेन 'सरस्वती' पत्रिकायां नवम्बर १९२७ तमे वर्षे प्रकाशितेन आलेखन गुरुप्रसादशास्त्रिमहोदय: विशिष्टं कार्यं सम्पादितवान्। संस्कृत-पत्रकारिताक्षेत्रे येषामवदानमासीत् तेष्वन्यतमा: श्रीदीनानाथशास्त्रिण:, एम. कृष्णामाचारियर-चिन्ताहरणचक्रवर्ति-वी.राघवन्-गणेशरामशर्मा-श्रीधरभास्करवर्णेकर प्रभृतय: विशेषेण उल्लेखनीया: विद्यन्ते। संस्कृतपत्रिकाया: विषये 'संस्कृत-पत्रकारिता' इतिहासग्रन्थस्य लेखकानां श्रीरामगोपालमिश्रमहोदयानां कथनमवलोकनीयमस्ति-'संस्कृत पत्र-पत्रिकाओं का प्रकाशन स्वयं अभावों को आमन्त्रण देता है, परन्तु संस्कृत-सेवा परायण विद्वानों ने इस अयाचित सेवा को स्वीकार किया।'

**संस्कृत-दैनिकपत्राणां नामानि**---

१-जयन्ती

२-संस्कृति:

३-सुधर्मा

४-सुनृतवादिनी

५ -संस्कृत साकेत

६-संस्कृतम्

७-देववाणी

संस्कृतदैनिकपत्रेषु 'सुधर्मा' दैनिकपत्रं विशिष्टतामातनोति। १९७० ईस्वीय वर्षाद् मैसूरनगरात् पत्रमिदं प्रकाश्यमानमासीत्। वरदराज अयंगारमहोदयै: पत्रमिदं सम्पादितम्। पत्रस्यास्य प्रकाशनं रविवासरे न भवति स्म। पत्रेऽस्मिन् बालसाहित्यस्य प्राधान्यमासीत्।

भारतीय स्वतंत्रता-आन्दोलने संस्कृतलेखका: अग्रगण्या: तस्यैवोदाहरणं संस्कृतसाकेतपत्रम्। संस्कृत-साकेत पत्रस्य १९२० तमे वर्षे आंग्लानां विरोधे प्रकाशनस्य निर्णय: अयोध्यावासिभि: विद्वद्भि: गृहीत:। तस्मिन्नेव समये महात्मागान्धिन: सत्याग्रह: प्रचल्यमान: आसीत्। पत्रस्यास्य प्रथमसम्पादका: हनुमत् प्रसाद त्रिपाठी महोदया: आसन्।

**संस्कृत-साप्ताहिक पत्रिका:**--

१- सुनृतवादिनी

२- मंजूषा

३- सुरभारती

४- भवितव्यम्

५- वैजयन्ती

६- पण्डित-पत्रिका

७- भाषी

८- गाण्डीवम्

**पाक्षिक-पत्र-पत्रिकाः--**

| | |
|---|---|
| १- विज्ञानचिन्तामणिः | ७- वाङ्मयम्। |
| २- मंजुभाषिणी | ८- उच्छृंखलम् |
| ३- विद्वन्मनोरञ्जिनी | ९- भारतवाणी |
| ४- अमरभारती | १०- संस्कृतवाणी |
| ५- मित्रम् | ११- शारदा |
| ६- सहस्रांशुः | १२- संस्कृतसंवादः |

अद्यत्वे बालसाहित्यमुद्दीश्य बहुचर्चा चर्च्यमाणाऽवलोक्यते परन्त्विदमवधेयमस्ति यत् शारदा-पाक्षिक-समाचारपत्रे 'बाल भारती' आन्तरभारती एवं शिशुभारती' इत्यादि स्तम्भेषु बालकानां कृते रचनाः सामग्र्यः प्रकाश्यन्ते स्म। यथा वा--प्रसारय संस्कृतध्वजम्। प्रताडय संस्कृतदुन्दुभिम्। प्रपूरय संस्कृतशंखम्। पठ संस्कृतम्। वद संस्कृतम्। लिख संस्कृतम्।

एवम्प्रकारेण वक्तुं शक्यते यत् विगतनैकेभ्यः वर्षेभ्यः प्रकाश्यमानानि दैनिक-साप्ताहिक-पाक्षिकसंस्कृतसमाचारपत्राणि नैजेः समाचारैः भव्यकलेवरैः च प्रायशः समस्तसंस्कृतजगत् चमत्कुर्वन्ति। वस्तुतः कस्यापि भाषायाः प्रचार-प्रसारे तत्साहित्य-सम्बद्धपत्रपत्रिकायाः किमपि विशिष्टं स्थानं भवति। संस्कृतपत्रकारितायाः क्षेत्रे पत्राणामेतेषां वैशिष्ट्यं योगदानं च सर्वतोभावेन विवेचनीयं वर्णनीयं चास्ति। संस्कृतसमाचारपत्राणीमानि समाचार-लेख-काव्य-समीक्षा-बालसाहित्य-टिप्पणी-स्तम्भादिभिः संस्कृतसाहित्य-मभिवर्धयन्ति।

**-प्रवक्ता (संस्कृत)**
**२ उच्च विद्यालयः, धनवारम्,**
**गिरिडीह, झारखण्डम्।**

# वाल्मीकेः सामाजिक-चिन्तनम्

-डॉ. शालिनी शुक्ला

संस्कृतसाहित्ये सतत् प्रकाश्यमाणनक्षत्रमिव उद्भासितः महर्षिः वाल्मीकिः किमपि परिचयं नापेक्ष्यते। देववाण्यां संस्कृतभाषायां निबद्धे रामायणमहाकाव्ये तस्य वैदुष्यं गहनचिन्तनं स्वतः एव परिलक्ष्यते। प्रसिद्धोऽयं यत् गीर्वाणभारते समुपासक एकदा 'तमसा' इत्याख्यायाः नद्याः तटे पूजारतः आसीत्। तस्मिन्नेव काले निषादस्य वाणेन विद्धं क्रौञ्चमिथुनादेकं स्वजीवनं तत्याज। एवं दृष्ट्वा अपरः क्रौञ्चः आर्तस्वरेण करुणक्रन्दनं चकार। तस्य करुणक्रन्दनं श्रुत्वा वाल्मीकिः द्रवीभूतः सञ्जातः। सः निषादम् एवं शशाप-

**मा निषाद प्रतिष्ठां त्वामगमः शाश्वतीः समाः।**
**यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।** रामा०, बालकाण्ड १/२/१५

क्रौञ्चक्रन्दनेन निष्पत्रस्य काव्यस्य परमनिदर्शनं रामायणम् अस्ति। वाल्मीकिः कवि आसीत्। कवेः शब्दस्य अर्थः कान्तप्रज्ञः त्रिकालाबाधितसत्यस्य साक्षात्कर्ता च अस्ति। सः समाजद्रष्टा आसीत् यतः रामायणे वर्णिताः सामाजिक मूल्याः वर्तमानसमयेऽपि समाजगतिनियामकाः पथप्रदर्शकाः च सन्ति।

समाजस्याधाराः परिवाराः एव भवन्ति। यथा प्रासादस्य सुदृढनिर्माण सुखस्थिरा मूलभित्तिः अपेक्ष्यते तथैव उत्तमसमाजस्य निर्माणाय उत्तमपरिवारस्य महती भूमिका वर्तते। वाल्मीकेः सामाजिक-चिन्तनं सामञ्जस्ये आधृतम्। परिवार-पारस्परिकसौमनस्यं वर्णितम्। वाल्मीकिः भ्रातृप्रेम रामायणे अनुपमरूपेण वर्णितवान्। ज्येष्ठपुत्रः एव राज्यस्य उत्तराधिकारिरूपेण स्वीकृतः। भरतः स्वमातारं कैकेयीम् एवं कथयति।

**अस्मिन् कुले हि सर्वेषां ज्येष्ठो राज्येऽभिषिच्यते।**
**अपरे भ्रातरस्तस्मिन् प्रवर्तन्ते समाहिताः ।।** रामा०, अयोध्याकाण्ड २/७३/२०

भरतस्य स्वभ्रातुः रामस्योपरि अनन्या भक्तेः विषये नास्ति किञ्चित् सन्देहः।
निषादराजा भरतविषये एवम् उक्तवान्-

**शश्वती खलु ते कीर्तिलोकाननु चरिष्यति।**
**यस्त्वं कृच्छ्रगतं रामं प्रत्यानयितुमिच्छसि।।** रामा०, अयोध्याकाण्ड २/८५/१३

परिवारे पितुः नियन्त्रणम् आसीत्। पितुः आज्ञायाः परिपालनं पुत्रस्य प्रथमं कर्त्तव्यम् आसीत्। रामः अपि स्वमातारं कैकेयी दशरथस्य इच्छायाः विषये प्रोक्तुम् अभिप्रेरितवान्। सः उवाच-

**न ह्यतो धर्मचरणं किञ्चिदस्ति महत्तरम्।**
**यथा पितरि शुश्रूषा तस्य वा वचनक्रिया।।** रामा०, अयोध्याकाण्ड २/११/२२

तस्मिन् समाजे यत्र कौशल्या सदृशाः नार्यः आसन् कैकेयीसदृशाः स्वार्थपरायणाः स्त्रियः अपि अभूवन्। किन्तु एतादृशाः नार्यः अपि स्वकृत्योपरि पश्चात्तपं चक्रुः। सारथी सुमन्त्रः न केवलं रथचालकः आसीत् नीतिज्ञः अपि। सः कैकेयीं सन्मार्गे चालयितुं यत्नवान्। सः उक्तवान्-

**आम्रं छित्वा कुठारेण निम्बं परिचरेत् तु कः।**

**यश्चैनं पयसा सिञ्चेन्नैवास्य मधुरो भवेत् ॥** रामा०, अयोध्याकाण्ड २/३५/१६

वाल्मीके: सामाजिकचिन्तनं सद्भावनया आच्छादितम्। सर्वे जना: स्वे स्वे कर्मणि निरता: आसन्। जना: धर्मपरायणा: सत्यमार्गगामिन: च आसन्। कथ्यते अपि–

**आसन् प्रजा धर्मपरा रामे शासति नानृताः।**

**सर्वे लक्षणसम्पन्ना: सर्वे धर्मपरायणा: ॥** रामा०, युद्धकाण्ड ६/१२८/१०५

तिर्यग्योनि–पक्षिण: अपि सत्कर्मे संलग्ना: अभूवन्। जटायु: साक्षात् शरण्यरक्षक: आसीत्। राम: तस्य प्रशंसायाम् एवं कथयति–

**सर्वत्र खलु दृश्यन्ते साधवो धर्मचारिणः।**

**शूराः शरण्याः सौमित्रे तिर्यग्योनिगतेष्वपि॥** राम०, अरण्यकाण्ड ३/६८/२४

वाल्मीकिना दृष्टे समाजे स्त्रिय: सुशिक्षिता: सुमतियुक्ताश्च आसन्। कुमार्गगामिनम् अपि स्वपतिं बालीं तारा सदुपदेशं प्रदत्तवती किन्तु मिथ्याभिमानी स: तस्या: वचनानां समादरं न कृतवान्–

**तदा हि तारा हितमेव वाक्यं**

**तं वालिनं पथ्यमिदं बभाषे।**

**न रोचते तद् वचनं हि तस्य**

**कालाभिपन्नस्य विनाशकाले॥** रामा०, किष्किन्धाकाण्ड ४/१५/३१

मन्दोदरी अपि पतिव्रता विदुषी च आसीत्। सा वारं वारं रावणं सीता प्रति आसक्तिविषये विधिसम्मतं मन्त्राणां प्रदत्तवती किन्तु विषयानुगामी स: तस्या: उपदेशस्य मर्म न ज्ञातवान्। रामेण हतं रावणं दृष्ट्वा मन्दोदरी एवं विललाप–

**पतिव्रतानां नाकस्मात् पतन्त्यश्रूणि भूतले।**

**कथं च नाम ते राजँल्लोकानाक्रम्य तेजसा॥** –रामा०, युद्धकाण्ड ६/१११/६७

वाल्मीकि: सामाजिकवर्णितसत्कर्मण: निर्वहनाय नैराश्यभावनाया: परित्यागविषये कथितवान्। सीता–वियोगेन दु:खितं रामं सुग्रीव: एवं शोकपरित्यक्तुं प्रेरयति–

**अलं वैक्लव्यमालम्ब्य धैर्यमात्मगतं स्मर।**

**त्वद्विधानां न सदृशं ईदृशं बुद्धिलाघवम् ॥** रामा०, अरण्यकाण्ड ४/७/५

रावण: न केवलं बुद्धिमान् सुदर्शन: आसीत् अपितु बलवान्, देवानां त्रासकश्च आसीत्। तस्यमिध्याहङ्कार:, असत्मार्गगमनम् एव तस्य विनाशस्य कारणौ अभूताम् अभवत्। तं दृष्ट्वा हनुमान् अपि अचिन्तयत्–

**अहो रूपमहो धैर्यमहो सत्त्वमहो द्युतिः।**

**अहोराक्षसराजस्य सर्वलक्षणयुक्तता ॥**

**यद्यधर्मो न बलवान् स्यादयं राक्षसेश्वरः।**

**स्यादयं सुरलोकस्य सशक्रस्यापि रक्षिता॥** रामा०, सुन्दरकाण्ड ५/४९/१७–१८

तस्मिन् समये नारीणां रक्षा समाजे आवश्यकी एव। रावणसदृशाः कापुरुषाः अपि तस्मिन् समाजे आसन् रामः तम् अकथयत् मम अनुपस्थितौ त्वं वैदेहीं हरितवान् किमिदं शौर्यम्? अहङ्कारमदेन आविष्टः त्वम् सीतां चौरसदृशं अपाहृत्य आत्मानं वीरं मन्यसे एतादृशस्य कृत्यस्य फलमपि विनाशकारिणं भवति। रामेण उक्ते श्लोकेऽस्मिन् स्त्रीणां विमर्षं प्रति वाल्मीकेः प्रगतिशीलस्य व्यावहारिकस्य च विचारस्य वर्णनम् अस्ति–

**स्त्रीषु शूर विनाथासु परदाराभिमर्शनम्।**
**कृत्वा कापुरुषं कर्म शूरोऽहमिति मन्यसे ॥**
**भिन्नमर्याद निर्लज्ज चरित्रेष्वनवस्थित।**
**दर्पान्मृत्युमुपादाय शूरोऽहमिति मन्यसे ॥** रामा०, युद्धकाण्ड ६/१०३/१३–१४

वाल्मीकिः 'सर्वे भवन्तु सुनिः' इत्युक्तेः प्रबलसमर्थकः आसीत्। तेन वर्णिते समाजे यथा दशरथ रामलक्ष्मण सदृशाः पुरुषाः सीताकौशल्यामन्दोदरीतारा सदृशाः स्त्रियः सन्मार्गगामिनश्च जनाः आसन् किन्तु यथा कथ्यते 'मुण्डे मुण्डे मतिर्भिन्ना' तावदानुसारेण समाजः सर्वचा दोषशून्यः न आसीत् रावणः, बाली, कुम्भकर्णः, सदृशाः कुमार्गगामिनः जनाः अपि तस्मिन् समाजे आसन्। किन्तु कथ्यते 'अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभं' एवं तेऽपि स्वदुष्टकर्मणः फलं प्राप्तवन्तः। ये जनाः विपरीताचरणं चक्रुः तेऽपि सामदामभेददण्हनीतिभिः सन्मार्गम् अङ्गीचक्रुः।

वाल्मीकेः सामाजिक चिन्तनं लोकमङ्गलस्य भावनया परिवेष्टितम् आसीत्। परिवारे समाजे च सर्वत्र मर्यादायाः पालनं जनाः अकुर्वन्। यथा पुत्रः पितरं प्रति, दम्पती अन्योन्यं प्रति, भ्राताभ्रातरं प्रति, प्रजा राजानं प्रति मर्यादापालने दृष्टवन्तः। समाजे सर्वान् जनान् प्रति समदृष्टिकोणस्य भावना व्यप्ता। निषादराज्ञः गुहस्य शबर्याः प्रसङ्गः एतादृशी भवाना परिपुष्यते एव।

येन केन प्रकारेण प्रगत्याकांक्षिणेऽस्मिन् वर्तमानसमये संहतेः अस्मिन् युगे स्वार्थपरित्यागस्य महती आवश्यकता एव। वाल्मीकेः सामाजिकसामञ्जस्य युक्त चिन्तनं न तात्कालिकम् आसीत्। वर्तमानसमयेऽपि वाल्मीकेः सामाजिक चिन्तनं प्रासङ्गिकम् अनुकरणीयम् च। उक्त च केनचित् कविना महर्षेः वाल्मीकेः विषये–

**कवीन्द्रं नौमि वाल्मीकिं यस्य रामायणीं कथाम्।**
**चन्द्रिकामिव चिन्वन्ति चकोरा इव साधवः ॥**

**–एसो० प्रोफेसर ( संस्कृत )**
**राजकीय महाविद्यालयः**
**कोटद्वारम्, भाबरः, ( उत्तराखण्डम् ) २४६१४९**

# संस्कृतभाषायां किं नास्ति?

-डॉ. उदयप्रकाशः झा

**'' संस्कृतं नाम दैवी वाक् अन्वाख्याता महर्षिभिः''**

**( काव्यादर्श १/३३ )**

संस्कृतं विश्वस्य प्राचीनतमा परिष्कृता च भाषास्ति। 'देववाणी' इति पदेनालङ्कृतेयं भाषा अत्यन्तं प्राक्कालतो न केवलं भारतीयानां अपितु विदेशीयानां कृतेऽपि श्रद्धायाः पात्रम् वर्तते। संस्कृतं सर्वासां भाषाणां जन्मदात्री अस्ति। भारतस्य गौरवस्य सांस्कृतिकमहत्त्वस्य च स्थापना संस्कृत-भाषायां सङ्कलितेन साहित्येनैव अस्ति। संस्कृत-साहित्यम् अत्यन्तं सम्पन्नं विशालमस्ति। विविधप्रकारकैः साहित्यैः सम्पन्नग्रन्थाः भाषाया अस्याः शोभाम् सम्वर्धयन्ति। वेद-वेदाङ्ग-ब्राह्मणोपनिषद् सूत्र-ज्यौतिष-शिल्प-काव्य-नाटक-साहित्यशास्त्रादिभिः सम्बन्धितं साहित्यं भाषायाम् अस्यां समुपलब्धमस्ति। सम्भवतः कोऽप्येवं विषयो भविष्यति यः संस्कृते उपलब्धो नास्ति। अस्य शब्दशक्तिः एवम् सुसम्पन्ना सशक्ता चास्ति यत् संसारस्य प्रत्येकायाः भाषायाः विषयस्य चानुमानं संस्कृते कर्तुं शक्यते।

**निदर्शनार्थमत्र संस्कृतभाषायाम् उपलब्धानां कतिपय विषयाणां ज्ञानं संक्षेपेण प्रस्तूयते-**

## संस्कृते गणित विषये ज्ञानम्

वेदाङ्गे कल्प-सूत्रे ज्यौतिषे च गणना, राशि-विद्या च चर्चिताऽस्ति। सनत्कुमारो यदा विविध-विषयाणां ज्ञानं प्राप्तुमिच्छन् नारदं प्रति चर्चां करोति, तदा सः गणितस्य ज्योतिषस्य चोल्लेखं करोति। वैदिक-गणितज्ञानाय कल्पसूत्रं एकं महत्त्वपूर्णं स्रोतमस्ति। श्रौतसूत्रेग्निहोत्रार्थं गणितीया निर्देशाः प्रदत्ताः सन्ति। शुल्बसूत्रं श्रौतसूत्रस्य एको विभागोऽस्ति। अस्मिन् ज्यामितिननिरूपणं तथा तत्सम्बन्धितसमस्यानं निर्देशः प्राप्यते। रेखीयवर्गः वृत्तम्, अङ्कगणित-बीजगणितयोश्च प्रकाराः अप्यत्र विनिर्दिष्टाः सन्ति।

एवमेव मानवशुल्बसूत्रे, आपस्तम्बशुल्बसूत्रे कात्यायनशुल्बसूत्रे च पर्याप्ताः गाणितीयोल्लेखाः सन्ति। कात्यायनयशुल्बसूत्रे परिमेयत्रिभुजपायथागोरसप्रमेयादीनां समुल्लेखोऽस्ति। वैदिकजनैः शुल्बसूत्राणां उपयोगः भवननिर्माणार्थं, इष्टकानां गणनार्थम् आकारनिर्माणार्थञ्च कृतः आसीत्

## संस्कृते रसायनशास्त्रविषये ज्ञानम्

ऋग्वेदसंहितायां धातोरुपयोगः स्वर्णेन समं कृतः। युगेऽस्मिन् रजतधातोः शोधनं कथं कृतम अस्य ज्ञानमुपलब्धं नास्ति, तथापि लघु-अग्निकण्डिकासु अस्य द्रवीकरणम् अनुमीयते एव। धात्वर्थं सामान्यतः 'अयस्' शब्दस्योपयोगः प्राप्तये किन्तु पश्चात् अयम् 'अयस्' इति शब्दः लौहधातोः अर्थे रूढोऽभवत्। वैदिकाः स्वर्णमलौकिकशक्त्याः रूपे अमन्यन्त। अथर्ववेदे स्वर्णधारणं दीर्घायुष्यकारणं कथ्यते।

वैदिकजनाः किण्वन-पेयं स्वीकुर्वन्ति स्म, तस्य च विधिमपि जानन्ति स्म। युगेऽस्मिन् सोमरसः दिव्यपानमासीत्। ऋग्वेदे एनम्प्रति सम्मानं प्रदर्शितमस्ति। एषः अमृतोऽपि उच्यते अस्मादतिरिक्तं यवैः सुराऽपि निर्मिता भवति स्म।

## संस्कृते राष्ट्रिय चेतनाविषये ज्ञानम्

वैदिकसहित्ये लौकिकसाहित्ये च राष्ट्रियोत्थानक्रमे विचार-साम्यं परस्परं सौमनस्यं, मित्रभावश्चादिष्टं भवति। वेदमन्त्रे काव्यादिग्रन्थे च राष्ट्रहिताय बहुधा मन्त्रादयः सूक्तयश्च राष्ट्रियैकताचेतनायाः प्रतीकाः वर्त्तन्ते। विश्वस्य प्राचीनतमे ग्रन्थे ऋग्वेदे सर्वप्रथमम् अनेके मन्त्राः एतादृशाः सन्ति, येभ्यो राष्ट्रियैकतायाः सम्यक् परिचयः प्राप्यते। अनेकेषु स्थलेषु सामाजिकं जीवनं निर्वाहयितुम् उत्प्रेरकाः सुपदेशाः प्रदत्ताः विराजन्ते। निम्नलिखिते मन्त्रे राष्ट्रियैकताचेतनायाः समुदघोषः प्रतीयते। यथा हि-

**''सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम्। देवा भागं यथा पूर्वे सञ्जानाना उपासते। समानी व आकूतिः समाना हृदयानि वः। समानमस्तु वो मनो यथा वः सुसहासति।''**

अपि चान्यत्र असमाकं राष्ट्रियचेतनाभावनायाः स्पष्ट उद्घोष एवमस्ति-

**''सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्॥**

भारतीयराष्ट्रियैकतायाः महती विशेषता अस्ति समस्त-मानवानां कृते मंगलकामना या नान्यत्र कुत्रापि दृष्टिपथमायति। गुप्तसाम्राज्यकालेऽपि आचार्यचाणक्यस्य अर्थशास्त्रे राष्ट्रियचेतनायाः महद् गौरवमयं स्वरूपम् अवलोक्यते। तेनोक्तं यद् भारतीयाः कस्यामपि दशायां पारतन्त्र्यं सहन्ते। आर्याः कदापि दासतां न स्वीकुर्वन्ति। अस्माकं संस्कृतसाहित्यं समस्तमानवतायाः बौद्धिकराजनीतिक-सांस्कृतिकाध्यात्मिकसामाजिकार्थिकादिसम्बन्धेषु ऐक्यानुभूति-चेतनाम् उद्बोधयति। एतादृशी चेतनैव राष्ट्रियतायाः वास्तविकं स्परूपम्। सर्वहितैषिणी भावनास्माकं राष्ट्रियचेतनायाः महती विशेषता। विश्वस्य प्राचीनतमे ग्रन्थे ऋग्वेदे सर्वप्रथमं राष्ट्रस्य राष्ट्रशक्तेश्च वर्णनं द्रष्टव्यम्। संस्कृतसाहित्ये प्रस्तुतेयं राष्ट्रियैकताया विश्वविश्रुता चेतनाभावना वस्तुतोऽनुकरणीया श्लघ्या चास्ति।[१]

## संस्कृते नीतिशास्त्रविषये ज्ञानम्-

यदि मनुष्यः संस्कृतेन निर्दिष्टे मार्गे वर्तेत् तर्हि तस्य जवीने व्यवहारिकतायाः धार्मिक प्रवृतेः सज्जनव्यक्ति त्वस्य परोपकारस्य, गुणानां, विद्वत्तायाः, दयालुतादीनां गुणानाम् आधानं भवेत्। विषयेऽस्मिन् केचन श्लोकाः अत्र प्रस्तूयन्ते-

यथा धर्माद्विमुखो मनुष्यः पशुवद् भवति भर्तृहरिणा विरचिते नीतिशतके लिखितमस्ति यद्-

**'' धर्मेण हीनाः पशुभिः समानाः।**[२]

हितकरा चेतोहरा च वाणी दुर्लभा भवति। भारवि-विरचिते किरातार्जुनीये निगदितमस्ति-

**''हितं मनोहारि च दुर्लभं वचः''**[३]

दुष्टस्य मित्रतायाः अपेक्षा उन्नतिं प्रति प्रणीयमानो महात्मभिः समं विरोधोऽपि समीनीचीनो भवति। किरातार्जुनीये भारविना भणितं-

**''समुन्नयन् भूतिमनार्यसङ्गमाद्वरं**
**विरोधोऽपि समं महात्मभिः''**[४]

गुणान् विना सत्कारो न भवति अर्थात् यं निकषा गुणाः भवन्ति समाजे तस्यैव प्रतिष्ठा भवति अर्थात् तस्यैव सम्मानो भवति। एतदपि किराजार्जुनीये उल्लिखितमस्ति-

**''गुणानुरोधेन विना न सत्क्रिया''[५]।**

'शठे शाठ्यं समाचरेत्' इति सूक्तिम् चरितार्थयन् भारविः कथयति किरातार्जुनीये-

**''व्रजन्ति ते मूढधियः पराभवं**
**भवन्ति मायाविषु ये न मायिनः''[६]**

एवम् संस्कृत-भाषायाम् निबद्धाः वशिष्टकाव्यकाराणां सूक्तयः व्यावहारिक ज्ञानप्रदाने समर्थाः सन्ति। समस्त भारतीय-जन-जीवनस्य धर्मस्य संस्कृतेश्च प्राणः संस्कृतमेव भवति। संस्कृतस्य पाठकः गुणान्वितः विनयी, न्यायवान् च भवति।

परन्तु केचन संस्कृतस्य निन्दकाः कदा-कदा संस्कृतं जातिविशेषस्य अतीतस्य वा भाषास्ति इति कथयन्ति तथा तस्यालोचनां कुर्वन्ति। एवं ते अज्ञानवशी भूत्वा द्वेषवशीभूत्वा वा कुर्वन्ति। संस्कृतभाषायां लिखितानां ग्रन्थानां सम्पूर्णगणना न तु कृताऽस्ति न च कर्तुं पार्यते। विदेशिनाम् आक्रमणैः पराधीनतायाः युगेऽस्मिन् अधिकं विनाशे भूते सति उपलब्धम् संस्कृतसाहित्यम्-संसारे विशिष्टं स्थानं भजते। अतिशयोक्ति न भवेत् यदि अहं वदामि यत्-

**यदि हास्ति संस्कृते तदन्यत्र।**
**यन्नेहास्ति संस्कृते न तत् क्वचित्॥**

संस्कृत-भाषायाः कोटि-ग्रन्थानाम् अधुनापि प्रकाशनं अवशिष्टम् अस्ति।

अन्ते वयम् इदं कथयितुं शक्नुमः यत्संस्कृत-सहित्यं सर्वासु भाषासु उपलब्धसाहित्ये संसारस्य प्रत्येकवस्तुनः प्रत्येकस्य च विषयस्य उल्लेखः समुपलभ्यते। संस्कृत-पठनेन श्रवणेन च मनुष्यः ज्ञान, सम्मानं, धनं, यशो, व्यवहारञ्च लभते।

---

सन्दर्भ ग्रन्थ सूची


१. संस्कृत साहित्य में राष्ट्रिय भावना, डॉ. हरिनारायण दीक्षित, देववाणी परिषद्, नई दिल्ली, प्रकाशित वर्ष १९८२

२. भर्तृहरि रचित नीतिशतकम्

३.किरातार्जुनीयम् १-४

४. किरातार्जुनीयम् १-८

५. किरातार्जुनीयम् १-१२

६. किरातार्जुनीयम् १-३०



**-१६४, मामूरपुर रामदेव चौक**
**नरेला, देहली-४०**

सुरुचिपूर्ण मासिक बाल संस्कृत पत्रिका

## "संस्कृत-चन्द्रिका"

नैतिक-मूल्यों के साथ-साथ
सम्पूर्ण देश के वरिष्ठ-बाल-साहित्यकारों तथा नवोदित प्रतिभाओं
की लेखनी की संयुक्त प्रस्तुति

## "संस्कृत-चन्द्रिका"

**( आई.एस.एस.एन.-2347—1565 )**

**संस्कृत भाषा के प्रचार-प्रसार हेतु प्रयत्नशील दिल्ली संस्कृत अकादमी, दिल्ली सरकार द्वारा सरल संस्कृत-भाषा में प्रकाशित एक ऐसी सुरुचिपूर्ण एवं ज्ञान-विज्ञान तथा नैतिक शिक्षा की मासिक बाल पत्रिका जो प्रत्येक वर्ग के पाठक-समुदाय की अपेक्षा के अनुकूल पठनीय एवं संग्रहणीय है।**

**मूल्यः- एक प्रति रु.२५/- मात्र, वार्षिक सदस्यता शुल्क रु. २५०/- मात्र**

**सुरुचि सम्पन्न स्वस्थ एवं सकारात्मक अभिव्यक्ति की संवाहिका**

## "संस्कृत-चन्द्रिका"

**के स्थायी अध्येता बनें।**

**आज ही अपना वार्षिक सदस्यता शुक्ल दिल्ली संस्कृत अकादमी के नाम से दिल्ली में भुनाये जाने योग्य बैंक ड्राफ्ट अथवा अकादमी के बैंक खाते सं. 01701040002562285, आई.एफ.सी. कोड-** IBKL 0000170 (IDBI BANK- Preet Vihar) **में ऑन लाईन भेज कर सदस्यता प्राप्त करें। शुल्क मल्टी सिटी चैक द्वारा भी स्वीकार्य होगा।**

पत्र व्यवहार का पता -

**सचिव/ सम्पादक, दिल्ली संस्कृत अकादमी, दिल्ली सरकार**
**प्लाट सं.-५ झण्डेवालान, करोलबाग, नई दिल्ली-११०००५**
**दूरभाष सं.- ०११-२०९२०३६३**

RNI No.
DELSAN/2002/8921

प्रकाशक एवं मुद्रक सचिव, दिल्ली संस्कृत अकादमी
के स्वामित्व में अकादमी के कार्यालय प्लाट सं.-५,
झण्डेवालान, करोलबाग, नई दिल्ली-११०००५
से प्रकाशित